निशम्य करुणं क्रौञ्चीं रुदतीं तां जगाविदम् । मा निषाद! प्रतिष्ठां त्वमगमः शाश्वतीःसमाः । यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् । तस्येदमुक्त्वा वचनं चिन्ताभूत् तदनन्तरम् । शकुनं शोचता ह्येवं किमतेद्व्याहृतं मया मुहूर्त्तमिव च ध्यात्वा वाक्यं तत् प्रविमृष्य च । शिष्यमाह स्थितं पार्श्वे भारद्वाजमिदं वचः । पादैश्चतुर्भिः संयुक्तमिदं वाक्यं समाक्षरैः । शोचतोक्तं मया यस्मात् तस्माच्छ्लोको भवत्विति" । एवं चिन्तयतस्तस्याश्रमे स्वयं ब्रह्मणागत्योपदिष्टम् । "महर्षे! यदयं प्रोक्तस्त्वया क्रौञ्चवधाश्रयः । श्लोक एवास्त्वयं बद्धस्तव वाक्यस्य शोचतः । स्वच्छन्दादेव ते ब्रह्मन्! प्रवृत्तेयं सरस्वती । रामस्य चरितं कृत्स्नं कुरु त्वमृषिसत्तम"! इत्युपदिष्टस्य वाल्मीकेःरामायणरचनेमतिरभूत् यथाह तत्रैव । "तस्य बुद्धिरभूत् तत्र वाल्मीकेरथ धीमतः । कृत्स्नं रामायणं श्लोकैरीदृशैः करवाण्यहम्" इत्येवमभिनिवेशं कृत्वा कृत्स्नं रामायणं कृतमिति सर्गशेषे तत्रैवोक्तम् "ततः स रामस्य चकार कीर्तिमान् । समाक्षरैः श्लोकशतैर्यशस्विनो यशस्करं काव्यमुदारधीः परम्"। इह लोके चतुष्पादश्लोकस्यादौ तेनैव प्रचारणात् तत्कृतकाव्यस्यादिकाव्यत्वम् । वेदे तु बहूनामनुष्टुप्छन्दस्कानां श्लोकानां सत्त्वेऽपि लोके प्रथमप्रचाराभावात्तस्याद्यत्वम् । तेन "ईशा वास्यमिदं सर्व्वं यत् किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम्" इत्युपक्रमे "असुर्य्या नाम ते लोका अन्धेन तमसा वृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः" इत्यादयः श्लोकाः शु०य० वे० ४० अध्याये पठिताः । एवम् ऋग्वेदादावपि बहवः तथाविधाः सन्ति" तथा च वेदे सत्त्वेऽपि लोके तेन प्रथमप्रचारणात्तस्याद्यकाव्यत्वम् । यत् तु उत्तरचरिते "चिरमाम्नायादन्योऽयं नूतनश्छन्दसामवतार" इति वर्णितम् तत् यथाश्रुतार्थेऽसङ्गतमेव । अन्यः लोकसिद्धवाक्यादित्यध्याहारेण आम्नायात् आम्नायं वेदं मूलत्वेन प्राप्य छन्दसां नवावतारइति व्याख्याने तु न कोऽपि दोष इति युक्तम् ।

**आदिकेशव** पु० कर्म्म० काशीस्थे केशवमूर्त्तिभेदे "आदिकेशव पूर्व्वेण स्वयमादित्यकेशवः" "आदिकेशवमुख्यांश्च केशवान् परितोष्य च" इति च काशी० ।

**आदिगदाधर** पु० १काशीस्थे विष्णुमूर्त्तिभेदे 'दत्तात्रेयेश्वरात् पूर्व्वमेष आदिगदाधर' इतिकाशी० ३६ अ० । २गयातीर्थस्थे विष्णुमूर्त्तिभेदे च । "आद्येन गदया चासौ यस्माद्दैत्यः स्थिरीकृतः । स्थित इत्येव हरिणा तस्मादादिगदाधरः" इति वायु०गया०२अ० तन्नामनिरुक्तिः उक्ता । "गयाशिरश्छादयित्वा गुरुत्वादास्थिता शिला । कालान्तरेण व्यक्तश्च स्थित आदिगदाधरः । तथा व्यक्तोऽव्यक्तरूपी आसीदादौ गदाधरः । आदिरादौ पूजितोऽत्र देवैर्ब्रह्मादिभिर्यतः । पाद्यार्घगन्धपुष्पाद्यैरत आदिगदाधरः" इति गारु०पु० निरुक्तिः । "आगत्य विष्णुः क्षीराब्धेः शिलायां संस्थितोऽभवत् । शिलायां निश्चलत्वाय स्वयमादिगदाधरः" वायुपुराणम् ।

**आदिजिन** पु० कर्म०स० । ऋषभदेवे हेम० ।

**आदितस्** अव्य०आदि+तसि । १आदौ इत्यर्थे "पतीन् प्रजानामसृजन्महर्षीनादितोदश" मनुः । आद्या०पञ्चम्यास्तसिः । २आदेरित्यर्थे च । "इदं शास्त्रन्तु कृत्वादौ मामेव स्वयमादितः" मनुः आदित आदिमारभ्येत्यर्थः ।

**आदिताल** पु० कर्म्म० । "एकएव लघुर्यत्र आदितालः स लघ्यते । गुरुस्तत्परतोवाच्यः प्रायेणैतन्निदर्शनम्" सङ्गीतशास्त्रलक्षिते तालभेदे ।

**आदितेय** पु० अदित्या अपत्यम् ढक् । १सुरमात्रे २सूर्य्ये च अदितिजशब्दे विवृतिः पृ०२१५ । "यदेनमदधुर्यज्ञियासो दिवि देवाः सूर्य्यमादितेयम्" ऋ०१०,८८,११ ।

**आदित्य** पु०अदितेरपत्यं ण्य । १देवमात्रे "तस्मा आदित्याश्च विश्वे च देवास्तृतीयसवने संप्रयन्ति" छा०उ० । २सूर्य्ये च "आदित्योब्रह्मेत्यादेशः" छा०उ० "जिगीषुरेष दिनकृदादित्येष्विव कल्पते इति" माघः । "अमी च कथमादित्याः प्रतापक्षतिशीतलाः" कुमा० । ३तदधिष्ठिते गगने दिवानिशं बंभ्रम्यमाणे लोकप्रकाशकरे तेजोमण्डले च "अग्नौ प्रस्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" मनुना अग्निहुतद्रव्याणां हविराज्यादीनां परमाणुमात्रतयाऽवस्थितानां दग्धशेषाणां सूर्य्यरश्मिनाकर्षणेन सूर्य्यलोकप्राप्त्या वृष्टिहेतुत्वमुक्तम् तच्च मण्डलार्थपरत्वएव सम्भवति "अथ यदेतदादित्यस्य शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्साम" "अथ यदेवैतदादित्यस्य शुक्लं भाः सैव सा, अथ यन्नीलं कृष्णं तदम" इति च छा०उ० । अत्र शुक्लकृष्णभायुक्ततया मण्डलपरत्वं गम्यते । "असौ वा आदित्यो देवमधु" छा०उ०अत्र च मण्डलपरत्वम् उत्तरत्र आकाशे रश्मिसम्बन्धकीर्त्तनात् स्पष्टमेव । "ज्योतिश्चरणाभिधानात्" शा०सू० भाष्ये च चक्षुर्वृत्तेर्निरोधकं शार्व्वरादिकं तमउच्यते तस्मा